# ramApatismaraNam

# રમાપતિસ્મરણમ્ અથવા કમલેશમાલા

## Document Information

Text title : ramApatismaraNam

File name : ramApatismaraNam.itx

Category : vishhnu, vishnu, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રમાપતિસ્મરણમ્ અથવા કમલેશમાલા

શ્રીગણેશાય નમઃ ।
મુકુન્દમિન્દીવરપત્રનેત્રં નદાત્મજં યોગિમનોનિકેતમ્ ।
વૃન્દારકાભિષ્ટુતપાદપદ્મં પાર્થસ્ય મિત્રં મનસા સ્મરામિ ॥ ૧॥

બ્રહ્મેન્દ્રગઙ્ગાધરવન્દિતાય મુકુન્દદેવાય પરાત્પરાય ।
નમઃ સમસ્તાસુરનાશકાય પક્ષીશયાનાય રમેશ્વરાય ॥ ૨॥

આશ્લિષ્ટરાધાકુચકુડ્મલાય ગોપાલકૃષ્ણાય નમોઽસ્તુ તસ્મૈ ।
ગોવર્ધનં યો ગિરિમુચ્ચશૃઙ્ગં લોકોપકારાય કિલોદ્દધાર ॥ ૩॥

કૃપાનિધે દીનશરણ્ય શૌરે દૈત્યાટવીદાવ રમેશ દેવ ।
ત્વત્પાદપઙ્કેરુહયુગ્મસ્વેવાં નક્તન્દિવં પ્રાપ્તુમહં સમીહે ॥ ૪॥

તદા મમ સ્યાદભિલાષસિદ્ધિસ્તદૈવ જાયેત મમાતિમોદઃ ।
યદા યતીન્દ્રેડિતસચ્ચરિત્રો મયિ પ્રસન્નો ભગવાન્મુરારિઃ ॥ ૫॥

કુશાગ્રસૂક્ષ્માપિ મતિર્ગતીનાં જ્ઞાતું ન શક્નોતિ તવ સ્વરૂપમ્ ।
અહં કથં વા મુસલાગ્રબુદ્ધિર્જ્ઞાતું ક્ષમઃ સ્યાં ખલુ તં ભવન્તમ્ ॥ ૬॥

નાહં નદીષ્ણો નિખિલાગમેષુ ન ચ પ્રવીણઃ કવિતાકલાયામ્ ।
તસ્માદશેષાન્ ગદિતું ગુણાંસ્તે શૌરે ન શક્તો બત મન્દભાગ્યઃ-॥ ૭॥

ઇતિ રમાપતિસ્મરણં (અથવા કમલેશમાલા) સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*